# संस्कृतवार्ताः

दिनाङ्क :-21.10.2025

प्रात: - 06:55

<u>प्रधानमन्त्री/गोआ</u>

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् विगते दशके भारतस्य रक्षोत्पादनं त्रिगुणितं भूत्वा सार्धैक-लक्ष-कोटि-रूप्यकात्मकम् अभवत्। अस्य शताब्दस्य चतुर्दश-वर्षात् अधुनावधि चत्वारिंशत्तः अपि अधिकाः स्वदेशीयाः युद्धपोताः नौपोताश्च निर्मिताः। सः अवदत् यत् भारतम् अधुना अधिकतः रक्षोपकरणानाम् उत्पादनं स्वयमेव करोति।

प्रधानमन्त्री प्रोक्तवान् यत् त्रयाणां सेनानाम् असाधारण-समन्वयेन सिन्दूराभियानावधौ पाकिस्तानं समर्पणं कर्तुं बाध्यम् अभवत्। भारतीय-सशस्त्र-सेनाभिः सह दीपावल्याः वार्षिकपरम्परां निर्वहन् प्रधानमन्त्री मोदी ह्यः गोवा-कारावार-तटयोः आई.एन्.एस्.-विक्रान्ते नौसेना-कर्मकरैः सह दीपोत्सवम् आचरितवान्। अस्मिन् अवसरे सः प्रावोचत् यत् भारतस्य प्रथमः स्वदेशीयः विमानवाहकः आई.एन्.एस्.-विक्रान्तः भारतस्य सशस्त्रसेनायाः क्षमतां प्रतिबिम्बयति।

सः अवदत् यत् आई.एन्.एस्.-विक्रान्तः केवलं विमानवाहकः एव नास्ति अपितु एकविंशतितम्याः शताब्द्याः भारतस्य प्रतिभायाः, दृढनिश्चयस्य वैश्विकप्रभावस्य च प्रमाणम् अपि अस्ति। प्रधानमन्त्री मोदी अवदत् यत् आई.एन्.एस्.-विक्रान्तः आत्मनिर्भरभारतस्य, 'मेड् इन् इण्डिया' चेत्येतयोः विशालः प्रतीकः अस्ति। प्रधानमन्त्री सुरक्षाबलानां शौर्यस्य दृढसंकल्पस्य च प्रशंसां कृतवान्। सः प्रोक्तवान् यत् अनेन कारणेन देशः माओवाद्यातङ्कवादं समाप्य महत्त्वपूर्णम् उपलब्धिं प्राप्तवान्। नौसैन्य-कर्मकरान् सम्बोधयन् सः अवदत् यत् सः सौभाग्यशाली अस्ति यत् सः तैः सह एतं पवित्रोत्सवम् आमानयति।

<u>राष्ट्रपतिः/केरलयात्रा</u>

राष्ट्रपतिः द्रौपदी-मुर्मूः अद्य केरलस्य चतुर्दिवसीय-यात्रायां तिरुवनन्तपुरं प्राप्नोति। श्वः राष्ट्रपतिः सबरीमाला-मन्दिरस्य दर्शनार्थं गमिष्यति। गुरुवासरे सा पूर्वराष्ट्रपतेः के.आर.नारायणस्य प्रतिमायाः अनावरणं तिरुवनन्तपुरस्य राजभवने करिष्यति।

<u>बिहार-निर्वाचनम्</u>

बिहार-विधानसभा-निर्वाचनस्य द्वितीय-चरणाय नामाङ्कन-पञ्जीकरण-प्रक्रिया ह्यः समाप्तिं गता। आहत्य त्रिचत्वारिंशदधिक-द्विशतासनेषु विंशति-जनपदानां द्वाविंशत्युत्तरशत-निर्वाचन-क्षेत्रेषु अस्मिन् चरणे नवम्बर-मासस्य एकादश-दिनाङ्के मतदानं भविष्यति। एतावता द्वितीय-चरणाय विभिन्नराजनैतिक-दलैः सह निर्दलीय-प्रत्याशिभिः षट्षष्ट्यधिकैकसहस्र-नामाङ्कन-पत्राणि पूरितानि। गतवासरे विधानसभा-निर्वाचनस्य प्रथम-चरणाय नामाङ्कन-परावर्तनस्य अन्तिमा तिथिः आसीत्। अष्टादश-जनपदानां

एकविंशत्युत्तरशत-निर्वाचन-क्षेत्रेषु प्रथम-चरणे नवम्बर-मासस्य षष्ठे दिनाङ्के मतदानं भविष्यति।

अश्विनीवैष्णवः/निरीक्षणम्

रेलमन्त्री अश्विनी-वैष्णवः ह्यः नवदिल्ल्यां रेल्-परिषदः परिचालन-कक्षस्य अवलोकनं कृतवान्। अस्मिन् अवसरे सः उत्सवावधौ यात्रिणां गमनागमनस्य विषये ज्ञातवान्। श्रीवैष्णवः चतुर्विंशति-होराः यावत् कार्यं कुर्वतां कर्मचारिणां मनोबलं वर्धितवान् अपि च तान् दीपावल्याम् अभिनन्दितवान्। वर्तमानोत्सवावधौ भारतीय-रेलविभागेन यात्रिणां वर्धमानाः याचनाः पूरयितुं व्यापक-प्रबन्धाः कृताः सन्ति। दीपावली-छठ-पर्वकाले सुगम-यात्रां सुनिश्चेतुं रेल-विभागः द्वादश-सहस्राधिकानि विशेष-रेलयानानि प्रचालयति।